दिनाङ्क :-15.11.2024

प्रात: - 06:55

## प्रधानमन्त्री-जनजातीयदिवस:

प्रधानमन्त्री नरेन्द्रमोदी अद्य बिहारप्रदेशस्य जमुईक्षेत्रं प्रति यात्रारतो भविष्यति। प्रधानमन्त्रिण: इयं यात्रा जनजातीय-गौरव-दिवसमुपलक्ष्य अथ च भगवत: बिरसामुण्डाइत्यस्य पञ्चाशदधिकैकशतमस्य जयन्तीसमारोहस्य अवसरे महत्वपूर्णास्ति । अत्रावसरे प्रधानमन्त्री एकस्या: स्मारक-मुद्राया: प्रैष्यचीटिकाया: च अनावरणं करिष्यति। श्रीमोदी ग्रामीण-दूरस्थ-क्षेत्रेषु आदिवासि-समुदायानां विकासाय चत्वारिंशदधिक-षड्शतोत्तर-षड्सहस्र-कोटिरूप्यकाणां विकासपरियोजनानाम् उद्घाटनं शिलान्यासञ्च विधास्यति। प्रधानमन्त्री तदनु प्रधानमन्त्रि-जनजाति-आदिवासि-न्याय-महाभियानस्य पीएम्-जनमनइत्यस्य अन्तर्गतं निर्मितानां एकादशसहस्रम् आवासानां गृहप्रवेशार्थं भागं स्वीकरिष्यति। अत्रावधौ मध्यप्रदेशस्य छिंदवाडा-जबलपुरयो: द्वयो: आदिवासि-स्वतन्त्रता-सेनानि-सङ्ग्रहालयो: जम्मूकश्मीरस्य श्रीनगरे सिक्किमस्य च गङ्गटोके द्वयो: आदिवासि-शोध-संस्थानयोरपि उद्घाटनं विधास्यते। अवधेयं वर्तते यत् प्रतिवर्षं नवम्बरमासस्य पञ्चदश दिनाङ्के भगवत: बिरसा-मुण्डाइत्येतस्य जयन्त्यवसरे जनजातीय-गौरव-दिवस: आचर्यते।

## गुरू-नानक जयन्ती

अशेषे हि राष्ट्रे अद्य गुरू-नानक-जयन्ती उत वा गुरूपर्व सोत्साहं परिपाल्यते। अयं शुभदिवस: सिखधर्मस्य प्रथमस्य गुरो: गुरू-नानक-देव-वर्यस्य जन्मदिवसस्य प्रतीको विद्यते। येन हि सिखधर्म: संस्थापित:। अस्मिन् दिने समग्रविश्वस्य भक्ता: प्रार्थनाम् आचरन्ति इति । शुभावसरेऽस्मिन् राष्ट्रपति: द्रौपदीमुर्मु: सर्वेभ्य: जनेभ्य: शुभकामना: प्रदत्तवती।

स्वसन्देशे राष्ट्रपति: भारते निवसतां विदेशेषु च निवसतां भारतीयजनानां कृते निजशुभवचांसि समर्पितवती। उपराष्ट्रपतिना च जनेभ्य: शुभकामना: प्रकटिता:।

**<u>प्रधानमन्त्री-बोडोलैण्ड-महोत्सव:</u>**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां प्रथमं बोडोलैण्ड-महोत्सवम् उद्घाटयिष्यति। द्विदिवसीयस्य अस्य महोत्सवस्य उद्देश्यं भाषा-साहित्य-संस्कृतीन् च आधृत्य शान्तिस्थापनं जीवन्तस्य बोडो-समाजस्य च निर्माणमिति वर्तते। प्रधानमन्त्रि-कार्यालयेन ज्ञापितं यत् अस्य महोत्सवस्य उद्देश्यं न केवलं बोडोलैण्ड इत्यस्मिन् अपि तु असम-पश्चिमबङ्गाल-नेपाल-इत्यादिषु पूर्वोतरीयभागेषु निवसतां जनानां एकीकरणमिति अस्ति। अस्य महोत्सवस्य शीर्षको विद्यते- समृद्धभारताय शान्ति: सद्भावश्च इति ।

**<u>झारखण्डप्रचार:</u>**

झारखण्डराज्ये विधानसभा-निर्वाचनस्य प्रथमचरणस्य मतदानानन्तरं द्वितीय-चरणीयमतदानार्थं प्रचाराभियानं द्रुततां भजते। अनेके: वरिष्ठनेतार: स्वक्षेत्रे नैका: जनसभा: सम्बोधयन्ति। भाजपेतिदलस्य वरिष्ठो नेता तथा च उत्तरप्रदेशस्य मुख्यमन्त्री योगीआदित्यनाथः धनबादे नैर्वाचनिक-जनसभां सम्बोधितवान्। स: आक्षिप्तवान् यत् झामुमो-सर्वकारेण राज्ये आव्रजकेभ्यः जनेभ्यः अवैधरीत्या प्रवेशार्थम् अनुमतिः प्रदत्ता। अपरपक्षे झामुमो-दलस्य वरिष्ठो नेता मुख्यमन्त्री च हेमन्त सोरेनः अविकसितस्य झारखण्ड राज्यस्य कृते उत्तरदायी भाजपादलमस्ति इति आरोपितवान्।

राजद-आजसु-वामपंथि-दलानां नेतारः अपि राज्यस्य विभिन्नेषु भागेषु नैर्वाचनिकसभाः सम्बोधितवन्त:।

ध्यातव्यमस्ति यत् द्वितीयचरणस्य अस्य मतदानं विंशति-दिनाङ्के समनुष्ठास्यते मतगणना च त्रयोविंशति दिनाङ्के प्रख्यापयिष्यते। अपरत्र महाराष्ट्रराज्येऽपि विभिन्नै: दलै: प्रचाराभियानं विधीयते। विंशति-दिनाङ्के एकस्मिन्नेव चरणे अत्र निर्वाचनं भविष्यति।

**क्रिकेट्**

क्रिकेट् प्रतिस्पर्धायाम् अद्य सायं जोहान्सबर्गनगरस्य वन्डरर्स-क्रीडाङ्गणे चतुर्थे अन्तिमे च विंशतिप्रतिविंशति-अन्ताराष्ट्रिय-द्वन्द्वे भारतं दक्षिणाफ्रीकादलेन सह क्रीडिष्यति। स्पर्धाया: प्रसारणं सार्धाष्टवादने भविष्यति।

।।इति वार्ता:।।